# ॥ ਗੋਪੀਗੀਤਮ੍ ॥

ਗੋਪ੍ਯ ਊਚੁਃ ।
ਜਯਤਿ ਤੇऽਧਿਕੰ ਜਨ੍ਮਨਾ ਵ੍ਰਜਃ
ਸ਼੍ਰਯਤ ਇਨ੍ਦਿਰਾ ਸ਼ਸ਼੍ਵਦਤ੍ਰ ਹਿ ।
ਦਯਿਤ ਦ੍ਰਸ਼੍ਯਤਾਂ ਦਿਕ੍ਸ਼ੁ ਤਾਵਕਾ-
ਸ੍ਤ੍ਵਯਿ ਧ੍ਰਤਾਸਵਸ੍ਤ੍ਵਾਂ ਵਿਚਿਨ੍ਵਤੇ ॥ 1॥
ਸ਼ਰਦੁਦਾਸ਼ਯੇ ਸਾਧੁਜਾਤਸ-
ਤ੍ਸਰਸਿਜੋਦਰਸ਼੍ਰੀਮੁਸ਼ਾ ਦ੍ਰਸ਼ਾ ।
ਸੁਰਤਨਾਥ ਤੇऽਸ਼ੁਲ੍ਕਦਾਸਿਕਾ
ਵਰਦ ਨਿਘ੍ਨਤੋ ਨੇਹ ਕਿੰ ਵਧਃ ॥ 2॥
ਵਿਸ਼ਜਲਾਪ੍ਯਯਾਦ੍ਵ੍ਯਾਲਰਾਕ੍ਸ਼ਸਾ-
ਦ੍ਵਰ੍ਸ਼ਮਾਰੁਤਾਦ੍ਵੈਦ੍ਯੁਤਾਨਲਾਤ੍ ।
ਵ੍ਰਸ਼ਮਯਾਤ੍ਮਜਾਦ੍ਵਿਸ਼੍ਵਤੋਭਯਾ-
ਦ੍ਰਸ਼ਭ ਤੇ ਵਯੰ ਰਕ੍ਸ਼ਿਤਾ ਮੁਹੁਃ ॥ 3॥
ਨ ਖਲੁ ਗੋਪਿਕਾਨਨ੍ਦਨੋ ਭਵਾ-
ਨਖਿਲਦੇਹਿਨਾਮਨ੍ਤਰਾਤ੍ਮਦ੍ਰਕ੍ ।
ਵਿਖਨਸਾਰ੍ਥਿਤੋ ਵਿਸ਼੍ਵਗੁਪ੍ਤਯੇ
ਸਖ ਉਦੇਯਿਵਾਨ੍ਸਾਤ੍ਵਤਾਂ ਕੁਲੇ ॥ 4॥
ਵਿਰਚਿਤਾਭਯੰ ਵ੍ਰਸ਼੍ਣਿਧੁਰ੍ਯ ਤੇ
ਚਰਣਮੀਯੁਸ਼ਾਂ ਸੰਸ੍ਰਤੇਰ੍ਭਯਾਤ੍ ।
ਕਰਸਰੋਰੁਹੰ ਕਾਨ੍ਤ ਕਾਮਦੰ
ਸ਼ਿਰਸਿ ਧੇਹਿ ਨਃ ਸ਼੍ਰੀਕਰਗ੍ਰਹਮ੍ ॥ 5॥
ਵ੍ਰਜਜਨਾਰ੍ਤਿਹਨ੍ਵੀਰ ਯੋਸ਼ਿਤਾਂ
ਨਿਜਜਨਸ੍ਮਯਧ੍ਵੰਸਨਸ੍ਮਿਤ ।
ਭਜ ਸਖੇ ਭਵਤ੍ਕਿੰਕਰੀਃ ਸ੍ਮ ਨੋ
ਜਲਰੁਹਾਨਨੰ ਚਾਰੁ ਦਰ੍ਸ਼ਯ ॥ 6॥
ਪ੍ਰਣਤਦੇਹਿਨਾਂ ਪਾਪਕਰ੍ਸ਼ਨੰ
ਤ੍ਰਣਚਰਾਨੁਗੰ ਸ਼੍ਰੀਨਿਕੇਤਨਮ੍ ।
ਫਣਿਫਣਾਰ੍ਪਿਤੰ ਤੇ ਪਦਾਂਬੁਜੰ
ਕ੍ਰਣੁ ਕੁਚੇਸ਼ੁ ਨਃ ਕ੍ਰਨ੍ਧਿ ਹ੍ਰੱਛਯਮ੍ ॥ 7॥
ਮਧੁਰਯਾ ਗਿਰਾ ਵਲ੍ਗੁਵਾਕ੍ਯਯਾ
ਬੁਧਮਨੋਜ੍ਞਯਾ ਪੁਸ਼੍ਕਰੇਕ੍ਸ਼ਣ ।
ਵਿਧਿਕਰੀਰਿਮਾ ਵੀਰ ਮੁਹ੍ਯਤੀ-
ਰਧਰਸੀਧੁਨਾऽऽਪ੍ਯਾਯਯਸ੍ਵ ਨਃ ॥ 8॥
ਤਵ ਕਥਾਮ੍ਰਤੰ ਤਪ੍ਤਜੀਵਨੰ
ਕਵਿਭਿਰੀਡਿਤੰ ਕਲ੍ਮਸ਼ਾਪਹਮ੍ ।
ਸ਼੍ਰਵਣਮੰਗਲੰ ਸ਼੍ਰੀਮਦਾਤਤੰ
ਭੁਵਿ ਗ੍ਰਣਨ੍ਤਿ ਤੇ ਭੂਰਿਦਾ ਜਨਾਃ ॥ 9॥
ਪ੍ਰਹਸਿਤੰ ਪ੍ਰਿਯ ਪ੍ਰੇਮਵੀਕ੍ਸ਼ਣੰ

ਵਿਹਰਣੰ ਚ ਤੇ ਧ੍ਯਾਨਮੰਗਲਮ੍ |
ਰਹਸਿ ਸੰਵਿਦੋ ਯਾ ਹ੍ਰੁਦਿਸ੍ਪ੍ਰੁਸ਼ਃ
ਕੁਹਕ ਨੋ ਮਨਃ ਕ੍ਸ਼ੋਭਯਨ੍ਤਿ ਹਿ || 10||
ਚਲਸਿ ਯਦ੍ਵ੍ਰਜਾੱਚਾਰਯਨ੍ਪਸ਼ੂਨ੍
ਨਲਿਨਸੁਨ੍ਦਰੰ ਨਾਥ ਤੇ ਪਦਮ੍ |
ਸ਼ਿਲਤ੍ਰੁਣਾਂਕੁਰੈਃ ਸੀਦਤੀਤਿ ਨਃ
ਕਲਿਲਤਾਂ ਮਨਃ ਕਾਨ੍ਤ ਗੱਛਤਿ || 11||
ਦਿਨਪਰਿਕ੍ਸ਼ਯੇ ਨੀਲਕੁਨ੍ਤਲੈ-
ਰ੍ਵਨਰੁਹਾਨਨੰ ਬਿਭ੍ਰਦਾਵ੍ਰੁਤਮ੍ |
ਘਨਰਜਸ੍ਵਲੰ ਦਰ੍ਸ਼ਯਨ੍ਮੁਹੁ-
ਰ੍ਮਨਸਿ ਨਃ ਸ੍ਮਰੰ ਵੀਰ ਯੱਛਸਿ || 12||
ਪ੍ਰਣਤਕਾਮਦੰ ਪਦ੍ਮਜਾਰ੍ਚਿਤੰ
ਧਰਣਿਮੰਡਨੰ ਧ੍ਯੇਯਮਾਪਦਿ |
ਚਰਣਪੰਕਜੰ ਸ਼ਨ੍ਤਮੰ ਚ ਤੇ
ਰਮਣ ਨਃ ਸ੍ਤਨੇਸ਼੍ਵਰ੍ਪਯਾਧਿਹਨ੍ || 13||
ਸੁਰਤਵਰ੍ਧਨੰ ਸ਼ੋਕਨਾਸ਼ਨੰ
ਸ੍ਵਰਿਤਵੇਣੁਨਾ ਸੁਸ਼੍ਠੁ ਚੁਮ੍ਬਿਤਮ੍ |
ਇਤਰਰਾਗਵਿਸ੍ਮਾਰਣੰ ਨ੍ਰੁਣਾਂ
ਵਿਤਰ ਵੀਰ ਨਸ੍ਤੇऽਧਰਾਮ੍ਰੁਤਮ੍ || 14||
ਅਟਤਿ ਯਦ੍ਭਵਾਨਹ੍ਨਿ ਕਾਨਨੰ
ਤ੍ਰੁਟਿਰ੍ਯੁਗਾਯਤੇ ਤ੍ਵਾਮਪਸ਼੍ਯਤਾਮ੍ |
ਕੁਟਿਲਕੁਨ੍ਤਲੰ ਸ਼੍ਰੀਮੁਖੰ ਚ ਤੇ
ਜਡ ਉਦੀਕ੍ਸ਼ਤਾਂ ਪਕ੍ਸ਼੍ਮਕ੍ਰੁੱਦ੍ਰੁਸ਼ਾਮ੍ || 15||
ਪਤਿਸੁਤਾਨ੍ਵਯਭ੍ਰਾਤ੍ਰੁਬਾਨ੍ਧਵਾ-
ਨਤਿਵਿਲੰਘ੍ਯ ਤੇऽਨ੍ਤ੍ਯਚ੍ਯੁਤਾਗਤਾਃ |
ਗਤਿਵਿਦਸ੍ਤਵੋਦ੍ਗੀਤਮੋਹਿਤਾਃ
ਕਿਤਵ ਯੋਸ਼ਿਤਃ ਕਸ੍ਤ੍ਯਜੇੱਨਿਸ਼ਿ || 16||
ਰਹਸਿ ਸੰਵਿਦੰ ਹ੍ਰੁੱਛਯੋਦਯੰ
ਪ੍ਰਹਸਿਤਾਨਨੰ ਪ੍ਰੇਮਵੀਕ੍ਸ਼ਣਮ੍ |
ਬ੍ਰੁਹਦੁਰਃ ਸ਼੍ਰਿਯੋ ਵੀਕ੍ਸ਼੍ਯ ਧਾਮ ਤੇ
ਮੁਹੁਰਤਿਸ੍ਪ੍ਰੁਹਾ ਮੁਹ੍ਯਤੇ ਮਨਃ || 17||
ਵ੍ਰਜਵਨੌਕਸਾਂ ਵ੍ਯਕ੍ਤਿਰੰਗ ਤੇ
ਵ੍ਰੁਜਿਨਹਨ੍ਤ੍ਰ੍ਯਲੰ ਵਿਸ਼੍ਵਮੰਗਲਮ੍ |
ਤ੍ਯਜ ਮਨਾਕ੍ ਚ ਨਸ੍ਤ੍ਵਤ੍ਸ੍ਪ੍ਰੁਹਾਤ੍ਮਨਾਂ
ਸ੍ਵਜਨਹ੍ਰੁਦ੍ਰੁਜਾਂ ਯੰਨਿਸ਼ੂਦਨਮ੍ || 18||
ਯੱਤੇ ਸੁਜਾਤਚਰਣਾਮ੍ਬੁਰੁਹੰ ਸ੍ਤਨੇਸ਼
ਭੀਤਾਃ ਸ਼ਨੈਃ ਪ੍ਰਿਯ ਦਧੀਮਹਿ ਕਰ੍ਕਸ਼ੇਸ਼ੁ |
ਤੇਨਾਟਵੀਮਟਸਿ ਤਦ੍ਵ੍ਯਥਤੇ ਨ ਕਿਂਸ੍ਵਿਤ੍
ਕੂਰ੍ਪਾਦਿਭਿਰ੍ਭ੍ਰਮਤਿ ਧੀਰ੍ਭਵਦਾਯੁਸ਼ਾਂ ਨਃ || 19||

ਇਤਿ ਸ਼੍ਰੀਮਦ੍ਭਾਗਵਤ ਮਹਾਪੁਰਾਣੇ ਪਾਰਮਹੰਸਜਾਂ ਸਂਹਿਤਾਯਾਂ
ਦਸ਼ਮਸ੍ਕਨ੍ਧੇ ਪੂਰ੍ਵਾਰ੍ਧੇ ਰਾਸਕ੍ਰੀਡਾਯਾਂ ਗੋਪੀਗੀਤਂ ਨਾਮੈਕਤ੍ਰਿਂਸ਼ੋऽਧ੍ਯਾਯਃ ||